## विभाषा घ्राधेट्शाच्छासः। (७८/२३७६)

घ्रा धेट् शा छा [1]सा इत्येतेभ्य [2]उत्तरस्य सिचः परस्मैपदेषु[3] विभाषा लुग् भवति। धेटः पूर्वेण प्राप्ते [4]विभाषार्थं वचनम्, परिशिष्टानामप्राप्ते। अघ्रात्, अघ्रासीत्। अधात्, अधासीत्। अशात्, अशासीत्। अच्छात्, अच्छासीत्। असात्, असासीत्। परस्मैपदेषु इत्येव, अघ्रासातां सुमनसौ देवदत्तेन ॥

## तनादिभ्यस्तथासोः। (७९/२५४७)

तनादिभ्य उत्तरस्य सिचः तथासोः [5]परतो विभाषा लुग् भवति। अतत, अतथाः। अतनिष्ट, अतनिष्ठाः। [6]असात, असाथाः। असनिष्ट, असनिष्ठाः। 'जनसनखनां सञ्झलोः' (६. ४. ४२/२५०४) इत्यात्वम्। थासा साहचर्यादात्मनेपदस्य [7]तशब्दस्य ग्रहणम्। [8]परस्मैपदे न भवति, अतनिष्ट यूयम्[9] (म. भा. १. ४९६) ॥

## मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः। (८०/३४०२)

मन्त्रविषये घस ह्वर णश वृ दह आत् वृच कृ गमि जनि इत्येतेभ्यः उत्तरस्य लेः लुग् भवति। घस — 'अक्षन् पितरोऽमीमदन्त पितरः' (तै.सं. १.८.५.३)। ह्वर इति 'ह्वृ कौटिल्ये' (धा.पा. ९३१) – '[10]मा ह्वार्मित्रस्य त्वा' (तै.सं. १.१.४.१)। णश – 'धूर्तिः [11]प्रणङ् मर्त्यस्य' (ऋ.१.१८.३)। वृ इति वृङ्वृञोः (धा.पा. १५१०, १२५५) सामान्येन ग्रहणम्—'सुरुचो वेन आवः' (वा.सं. १३.३)। दह — 'मा न आ धक्' (ऋ.६.६१.१४)। आत् इति [12]आकारान्तग्रहणम्। 'प्रा पूरणे' (धा.पा.१०६१)–'[13]आप्रा द्यावापृथिवी अन्तरिक्षम्' (ऋ.१.११५.१)। वृच् — 'मा नो अस्मिन् महाधने परा वर्ग् भारभृद्यथा' (ऋ.८.७५.१२)। कृ — 'अक्रन् कर्म कर्मकृतः'[14] (तै. सं. १. ८. ३. ३)। गमि — '(सद्यः पुष्टिं निरुन्धानासो) अग्मन्' (ऋ. १. १३२. ७)। जनि — 'अज्ञत वा अस्य दन्ताः' (ऐ. ब्रा. ७. १४. २)। [15]ब्राह्मणे प्रयोगोऽयम्। मन्त्रग्रहणं [16]तु छन्दस [17]उपलक्षणार्थम् ॥

## आमः। (८१/२२३८)

आमः [18]परस्य लेः लुग् भवति। ईहाञ्चक्रे। [19]ऊहाञ्चक्रे। ईक्षाञ्चक्रे ॥

## अव्ययादाप्सुपः। (८२/४५२)

[20]अव्ययादुत्तरस्य आपः [21]सुपश्च लुग् भवति। [22]तत्र शालायाम्। [23]यत्र शालायाम्। सुपः खल्वपि– कृत्वा। [24]हृत्वा ॥

---

1. सा नास्ति ह. 2. परस्य फ. 3. परतः इत्यधिकम् क.ड.इ.फ. 4. विभाषा क.ड.इ.फ. 5. परतो नास्ति इ. 6. असत, असथाः इ. 7. तस्य क, तशब्दस्य नास्ति ह. 8. तेन इत्यधिकम् ह. 9. इति इत्यधिकम् क. इ. ग. 10. मा ह्वार्मित्रस्य त्वम् मुद्रितपुस्तकेषु, मन्त्रस्य त्वम् क. 11. प्राणङ् मुद्रितपुस्तकेषु, प्राणद् वैश्यस्य ड, प्राणद् दैत्यस्य क.इ. 12. आकारान्तानां ड. 13. आप्रात् ड. 14. कर्म नास्ति ड. 15. ब्राह्मणप्रयोगोऽयम् ड. 16. तु नास्ति ड. 17. उपलक्षणम् क. ड. इ. ह. 18. उत्तरस्य फ. 19. नास्ति क.ड. इ. फ. 20. अव्ययादङ्गादुत्तरस्य फ. ग. 21. सुपश्चाङ्गादुत्तरस्य क. 22. आपस्तावत् इत्यधिकम् क. इ. 23. उदाहरणमिदं नास्ति फ. 24. हृत्वा क, हित्वा अ. ब. ग.